गोरक्षी २ ताम्रदुग्धा ३ रसायनी ४ बहुपत्री ५ वन्दना ६ जीवा ७ अमृतसञ्जीवनी ८। अस्या गुणाः। मधुरत्वम्। रुच्यत्वम्। संग्राहित्वम्। हिमत्वम्। सर्व्ववश्यकारित्वम्। रससिद्धिगुणप्रदत्वञ्च। इति राजनिर्घण्टः॥

गोरक्षी, स्त्री, (गां रक्षति पालयति इति। "कर्म्मण्यण्।" ३।२।१। इति अण्। ततो ङीप्।) क्षुद्रक्षुपविशेषः। सा तु मालवे प्रसिद्धा। तत्पर्य्यायः। सर्पदण्डी २ दीर्घदण्डी ३ क्षुद्रदण्डिका ४ चित्रला ५ गन्धबहुला ६ गोपाली ७ पञ्चपर्णिका ८। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। शिशिरत्वम्। दाहपित्तविस्फोटवान्त्यतीसारज्वरदोषनाशित्वञ्च। गोरक्षदुग्धा। कुम्भतुम्बी। इति राजनिर्घण्टः॥

गोरङ्कुः, पुं, (गवा वाचा रङ्कुर्मृगविशेष इव।) पक्षिभेदः। नग्नकः। बन्दी। इति मेदिनी। के। ९५॥ क्वचित् पुस्तके नग्नकस्थाने नमकोऽपि पाठः॥

गोरटः, पुं, (गवि इन्द्रिये रटतीति। रट्+अच्।) दुर्गन्धखदिरः। इति राजनिर्घण्टः॥

गोरणं, क्ली, (गुर्+भावे ल्युट्।) गुरणम्। (गुर्य्यते गम्यते बलमनेनेति। गुर+करणे ल्युट्।) उद्यमः। इत्यमरटीका॥

गोरसः, पुं, (गवां रसः।) दुग्धम्। दधि। तक्रम्। इति हेमचन्द्रः। ३। ७२॥ (यथा, गोः रामायणे। ३। २२। ७।

"प्रासन्नकास्ता जनपदाः सम्पन्नबहुगोरसाः।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः॥"
"विरुद्धा गुरवो रूक्षा ग्राहिणस्तक्रपिण्डकाः।
गोरसानामयं वर्गो नवमः परिकीर्त्तितः॥"

इति चरके सूत्रस्थाने २७ अध्याये॥)

गोरसजं, क्ली, (गोरसात् जायते इति। गोरस+जन्+"अन्येष्वपि दृश्यते।" ३।२।१०१। इति डः।) तक्रम्। इति राजनिर्घण्टः॥

गोराटी, स्त्री, (गां मनुष्यवद्वाचं रटतीति। रट्+"कर्म्मण्यण्।" ३। २। १। इत्यण्। ततो ङीप्।) शारिकापक्षी। इति हेमचन्द्रः। ४। ४०२॥

गोराटिका, स्त्री, (गोराटी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च। ततो निपातनात् साधुः। गोराटिका इत्यपि दृश्यते।) शारिकापक्षी। इति राजनिर्घण्टः॥

गोरिका, स्त्री, (गोराटिका+पृषोदरात् साधुः।) शारिकापक्षी। इति राजनिर्घण्टः॥

गोरुतं, क्ली, (गो रुतं रवः श्रूयते यावता पथेति शेषः। गोशब्दः श्रुतिगोचरत्वेन अस्त्यस्य इत्यच् इत्येके वस्तुतस्तु पारिभाषिकोऽयं शब्दः।) क्रोशद्वयम्। इति हेमचन्द्रः। ३। ५५१॥ (गवां रुतं रवः इति तत्पुरुषसमासे तु गवां शब्दमात्रे। तत्तु कालादिभेदेन स्वामिनरपतिप्रभृतीनां शुभाशुभकरं स्यात्। यथा, बृहत्संहितायाम्। ९२। १—३।

"गावो दीनाः पार्थिवस्याशिवाय
पादैर्भूमिं कुट्टयन्तश्च रोगान्।
मृत्युं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्करानारुवन्त्यः॥
अकारणे क्रोशति चेदनर्थो
भयाय रात्रौ वृषभः शिवाय।
भृशं निरुद्धा यदि मक्षिकाभि-
स्तदाशु वृष्टिं सरमात्मजैर्वा॥
आगच्छन्त्यो वेश्म बम्भारवेण
संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः।
आर्द्राङ्ग्यो वा हृष्टरोमाः प्रहृष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम्॥")

गोरोचं, क्ली, (गोभिः तेजोभिरुच्यते दीप्यते इति। रुच्+अच्। गा इन्द्रियाणि इन्द्रियोपलक्षितानि शरीरादीनि रोचयति दीपयति औषधादियोगेनेत्यर्थः। रुच्+णिच्+अच्।) हरितालम्। इति राजनिर्घण्टः॥

गोरोचना, स्त्री, (गोर्जाता रोचना हरिद्रा इव।) स्वनामख्यातपीतवर्णद्रव्यम्। तत्तु गोमस्तकस्थशुष्कपित्तम्। यथा, माधवकरे।

"विशोषयेद्वस्तिगतं सशुक्रं
मूत्रं सपित्तं पवनः कफं वा।
यदा तदाश्मर्युपजायते च
क्रमेण पित्तेष्विव रोचना गोः॥"

तत्पर्य्यायः। रुचिः २ शोभा ३ रुचिरा ४ शोभना ५ शुभा ६ गौरी ७ रोचनी ८ पिङ्गा ९ मङ्गल्या १० मङ्गला ११ शिवा १२ पीता १३ गौतमी १४ गवा १५ वन्दनीया १६ काञ्चनी १७ मेध्या १८ मनोरमा १९ श्यामा २० रामा २१। इति राजनिर्घण्टः॥ वन्द्या २२ रोचना २३। अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। वश्यमङ्गलकान्तिकारित्वम्। विषालक्ष्मीग्रहोन्मादगर्भस्रावक्षतनाशित्वञ्च। इति भावप्रकाशः॥ रुच्यत्वम्। पवित्रताग्रहजारहितकारित्वम्। कृमिकुष्ठनाशित्वम्। भूतोपशमनत्वम्। जनमोहनत्वञ्च। इति राजनिर्घण्टः॥ (यथा, कुमारे। ७। १५।

"विन्यस्तशुक्लागुरुचक्रुरङ्गं
गोरोचनापत्त्रविभक्तमस्याः।"
"क्रमेण पित्तेष्विव रोचना गोः।"

इति माधवकृतरुग्विनिश्चयस्याश्मर्य्यधिकारे॥)

गोर्दं, क्ली, (गुर्+"अब्दादयश्च।" उणां। ४।९८। इति ददन्प्रत्ययेन निपातनात् साधुः।) मस्तिष्कम्। मस्तकस्नेहः। इत्यमरः। २।६।६५॥ (मस्तिष्कशब्देऽस्य विवरणं ज्ञातव्यम्॥)

गोलं, क्ली, (गुड्+भावे घञ् डस्य लत्वं च।) मण्डलम्। इति मेदिनी। ले। २५॥ (यथा, भागवते। ३। २१। ४३।

"प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया॥")

गोलः, पुं, (गुड्+भावे घञ् अजिवेके। डस्य लत्वम्।) सर्व्ववर्त्तुलः। इति हेमचन्द्रः॥ मदनवृक्षः। इति रत्नमाला॥ जारात् विधवायाः सुतः। इति धरणी॥ (यथा, याज्ञवल्क्ये। १। २२२।

"अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः॥")

बोलः। इति जटाधरः॥ भूगोलः खगोलश्च। (यथा, भागवते। ५। २०। ४३।

"सूर्य्यास्तगोलयोर्मध्ये कोटयः स्युः पञ्च
विंशतिः॥")

यथा, शिद्धान्तशिरोमणौ।

"गोलं श्रोतुं यदि तव मतिर्भास्करीयं प्रकाशलम्॥"

एकराशौ षड्ग्रहयोगः। यथा, प्रश्नकौमुद्याम्।

"ग्रहाणामेकस्मिन् यदि भवति षष्ठी निवसतिस्तदा गोलो योगः प्रलयपदमिन्द्रोऽपि लभते। भवेल्लोको रुग्णः परिहरति पुत्रञ्च जननी कृपार्त्ता नाशः स्यात् ज्वलति वसुधा शुष्यति नदी॥"

एकराशौ सप्तग्रहयोगश्च। यथा, मयूरचित्रके।

"सप्तग्रहा यद्येकस्था गोलयोगस्तदा भवेत्।
दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले नृपक्षयः॥"

अपि च। [संख्याख्या।

"एकादियच्छोपेतैरुक्तान् योगान् विहाय
गोलयुक्शूलकेदारपाशदामाख्यवीनाः स्युः॥
दुःखितदरिद्रघातुकवधिकरदुःशीलपशुप-
निपुणानाम्॥
जन्मक्रमेण दुःखिनः परभाग्यैः सर्व्व एवैते॥"
इति दीपिका॥

गोलकं, क्ली, (गुड्+घञ्। स्वार्थे कन् च। ण्वुल् इत्येके।) गोलोकम्। यथा, तन्त्रे।

"यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके॥"

गोलकः, पुं, (गुड्+घञ्। ततः स्वार्थे कन्। डस्य लत्वं च। ण्वुल् इत्येके।) मृते भर्त्तरि जारजः। इत्यमरः॥ राँड़ेर छेले इति भाषा॥ (यथा, मनुः। ३। १५६।

"शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ॥")

अलिञ्जरः। गुड़ः। पिण्डः। इति हेमचन्द्रः॥ गन्धरसः। इति रत्नमाला॥ कलायः। इति शब्दचन्द्रिका॥ मठर इति ख्यातः॥

गोला, स्त्री, (गां पृथ्वीं सर्व्वं जगदित्यर्थः स्वशक्तिव्यापकतया लाति प्रलयकाले स्वस्मिन् लाति गृह्णाति इति वा।) दुर्गा। (गां इन्द्रियोपलक्षितं जलरूपशरीरव्यापकतया लाति।) गोदावरी। (गां वाचं लाति। ला+क्विप्।) सखी। कुनटी। पत्राञ्जनम्। मण्डलम्। अलिञ्जरः। बालक्रीड़नकाष्ठम्। इति मेदिनी। ले। २५॥

गोलाङ्गूलः, पुं, (गोर्लाङ्गूलवल्लाङ्गूलमस्य।) वानरः। (यथा, रामायणे। ६। १०५। ८।

"निरुजो निर्व्रणाश्चैव सम्पन्नबलपौरुषान्।
गोलाङ्गूलांस्तथैवर्क्षान् द्रष्टुमिच्छामि मानद!॥"

तत्पर्य्यायः। कपित्थास्यः २ दधिशोणः ३ नगाटनः ४। इति त्रिकाण्डशेषः॥ कृष्णवानरः। इति राजनिर्घण्टः॥

गोलासः, पुं, (गां पृथ्वीं भूमिमित्यर्थः लासयति उल्लासयति विभूषयति इति यावत्।) गोमयच्छत्रिका। शिलीन्ध्रम्। इति हारावली। २५॥